# || ગોપીગીતમ્ ||

ગોપ્ય ઊચુઃ |
જયતિ તેઽધિકં જન્મના વ્રજઃ
શ્રયત ઇન્દિરા શશ્વદત્ર હિ |
દયિત દૃશ્યતાં દિક્ષુ તાવકા-
સ્ત્વયિ ધૃતાસવસ્ત્વાં વિચિન્વતે || 1||
શરદુદાશયે સાધુજાતસ-
ત્સરસિજોદરશ્રીમુષા દૃશા |
સુરતનાથ તેઽશુલ્કદાસિકા
વરદ નિઘ્નતો નેહ કિં વધઃ || 2||
વિષજલાપ્યયાદ્વ્યાલરાક્ષસા-
દ્વર્ષમારુતાદ્વૈદ્યુતાનલાત્ |
વૃષમયાત્મજાદ્વિશ્વતોભયા-
દૃષભ તે વયં રક્ષિતા મુહુઃ || 3||
ન ખલુ ગોપિકાનન્દનો ભવા-
નખિલદેહિનામન્તરાત્મદૃક્ |
વિખનસાર્થિતો વિશ્વગુપ્તયે
સખ ઉદેયિવાન્સાત્વતાં કુલે || 4||
વિરચિતાભયં વૃષ્ણિધુર્ય તે
ચરણમીયુષાં સંસૃતેર્ભયાત્ |
કરસરોરુહં કાન્ત કામદં
શિરસિ ધેહિ નઃ શ્રીકરગ્રહમ્ || 5||
વ્રજજનાર્તિહન્વીર યોષિતાં
નિજજનસ્મયધ્વંસનસ્મિત |
ભજ સખે ભવત્કિંકરીઃ સ્મ નો
જલરુહાનનં ચારુ દર્શય || 6||
પ્રણતદેહિનાં પાપકર્શનં
તૃણચરાનુગં શ્રીનિકેતનમ્ |
ફણિફણાર્પિતં તે પદાંબુજં
કૃણુ કુચેષુ નઃ કૃન્ધિ હૃચ્છયમ્ || 7||
મધુરયા ગિરા વલ્ગુવાક્યયા
બુધમનોજ્ઞયા પુષ્કરેક્ષણ |
વિધિકરીરિમા વીર મુહ્યતી-
રધરસીધુનાઽઽપ્યાયયસ્વ નઃ || 8||
તવ કથામૃતં તપ્તજીવનં
કવિભિરીડિતં કલ્મષાપહમ્ |
શ્રવણમંગલં શ્રીમદાતતં
ભુવિ ગૃણન્તિ તે ભૂરિદા જનાઃ || 9||
પ્રહસિતં પ્રિય પ્રેમવીક્ષણં

વિહરણં ચ તે ધ્યાનમંગલમ્ |
રહસિ સંવિદો યા હૃદિસ્પૃશઃ
કુહક નો મનઃ ક્ષોભયન્તિ હિ || 10||
ચલસિ યદ્વ્રજાચ્ચારયન્પશૂન્
નલિનસુન્દરં નાથ તે પદમ્ |
શિલતૃણાંકુરૈઃ સીદતીતિ નઃ
કલિલતાં મનઃ કાન્ત ગચ્છતિ || 11||
દિનપરિક્ષયે નીલકુન્તલૈ-
ર્વનરુહાનનં બિભ્રદાવૃતમ્ |
ઘનરજસ્વલં દર્શયન્મુહુ-
ર્મનસિ નઃ સ્મરં વીર યચ્છસિ || 12||
પ્રણતકામદં પદ્મજાર્ચિતં
ધરણિમંડનં ધ્યેયમાપદિ |
ચરણપંકજં શન્તમં ચ તે
રમણ નઃ સ્તનેષ્વર્પયાધિહન્ || 13||
સુરતવર્ધનં શોકનાશનં
સ્વરિતવેણુના સુષ્ઠુ ચુમ્બિતમ્ |
ઇતરરાગવિસ્મારણં નૃણાં
વિતર વીર નસ્તેઽધરામૃતમ્ || 14||
અટતિ યદ્ભવાનહ્નિ કાનનં
ત્રુટિર્યુગાયતે ત્વામપશ્યતામ્ |
કુટિલકુન્તલં શ્રીમુખં ચ તે
જડ ઉદીક્ષતાં પક્ષ્મકૃદ્દૃશામ્ || 15||
પતિસુતાન્વયભ્રાતૃબાન્ધવા-
નતિવિલંઘ્ય તેઽન્ત્યચ્યુતાગતાઃ |
ગતિવિદસ્તવોદ્ગીતમોહિતાઃ
કિતવ યોષિતઃ કસ્ત્યજેન્નિશિ || 16||
રહસિ સંવિદં હૃચ્છયોદયં
પ્રહસિતાનનં પ્રેમવીક્ષણમ્ |
બૃહદુરઃ શ્રિયો વીક્ષ્ય ધામ તે
મુહુરતિસ્પૃહા મુહ્યતે મનઃ || 17||
વ્રજવનૌકસાં વ્યક્તિરંગ તે
વૃજિનહન્ત્ર્યલં વિશ્વમંગલમ્ |
ત્યજ મનાક્ ચ નસ્ત્વત્સ્પૃહાત્મનાં
સ્વજનહૃદ્રુજાં યન્નિષૂદનમ્ || 18||
યત્તે સુજાતચરણામ્બુરુહં સ્તનેષ
ભીતાઃ શનૈઃ પ્રિય દધીમહિ કર્કશેષુ |
તેનાટવીમટસિ તદ્વ્યથતે ન કિંસ્વિત્
કૂર્પાદિભિર્ભ્રમતિ ધીર્ભવદાયુષાં નઃ || 19||

ઇતિ શ્રીમદ્ભાગવત મહાપુરાણે પારમહંસ્યાં સંહિતાયાં
દશમસ્કન્ધે પૂર્વાર્ધે રાસક્રીડાયાં ગોપીગીતં નામૈકત્રિંશોઽધ્યાયઃ ||